श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ एकोनविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनविंशः सर्गः ॥

**यज्ञरक्षणाय रामं मे देहीति विश्वामित्रवचः श्रुत्वा दशरथस्य दुःखं मोहश्च**

तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरम्।
हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत॥ **1.19.1** ॥

सदृशं राजशार्दूल तवैवं भुवि नान्यतः।
महावंशप्रसूतस्य वसिष्ठव्यपदेशिनः॥ **1.19.2** ॥

यत् तु मे हृद्गतं वाक्यं तस्य कार्यस्य निश्चयम्।
कुरुष्व राजशार्दूल भव सत्यप्रतिश्रवः॥ **1.19.3** ॥

अहं नियममातिष्ठे सिद्ध्यर्थं पुरुषर्षभ।
तस्य विघ्नकरौ द्वौ तु राक्षसौ कामरूपिणौ॥ **1.19.4** ॥

व्रते तु बहुशश्चीर्णे समाप्त्यां राक्षसाविमौ।
मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ॥ **1.19.5** ॥

तौ मांसरुधिरौघेण वेदिं तामभ्यवर्षताम्।
अवधूते तथाभूते तस्मिन् नियमनिश्चये॥ **1.19.6** ॥

कृतश्रमो निरुत्साहस्तस्माद् देशादपाक्रमे।
न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव॥ **1.19.7** ॥

तथाभूता हि सा चर्या न शापस्तत्र मुच्यते।
स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमम्॥ **1.19.8** ॥

काकपक्षधरं वीरं ज्येष्ठं मे दातुमर्हसि।
शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा॥ **1.19.9** ॥

राक्षसा ये विकर्तारस्तेषामपि विनाशने।
श्रेयश्चास्मै प्रदास्यामि बहुरूपं न संशयः॥ **1.19.10** ॥

त्रयाणामपि लोकानां येन ख्यातिं गमिष्यति।
न च तौ राममासाद्य शक्तौ स्थातुं कथञ्चन॥ **1.19.11** ॥

न च तौ राघवादन्यो हन्तुमुत्सहते पुमान्।
वीर्योत्सित्तौ हि तौ पापौ कालपाशवशं गतौ॥ **1.19.12** ॥

रामस्य राजशार्दूल न पर्याप्तौ महात्मनः।
न च पुत्रगतं स्नेहं कर्तुमर्हसि पार्थिव॥ **1.19.13** ॥

अहं ते प्रतिजानामि हतौ तौ विद्धि राक्षसौ।
अहं वेद्मि महात्मानं रामं सत्यपराक्रमम्॥ **1.19.14** ॥

वसिष्ठोऽपि महातेजा ये चेमे तपसि स्थिताः।
यदि ते धर्मलाभं तु यशश्च परमं भुवि॥ **1.19.15** ॥

स्थिरमिच्छसि राजेन्द्र रामं मे दातुमर्हसि।
यद्यभ्यनुज्ञां काकुत्स्थ ददते तव मन्त्रिणः॥ **1.19.16** ॥

वसिष्ठप्रमुखाः सर्वे ततो रामं विसर्जय।
अभिप्रेतमसंसक्तमात्मजं दातुमर्हसि॥ **1.19.17** ॥

दशरात्रं हि यज्ञस्य रामं राजीवलोचनम्।
नात्येति कालो यज्ञस्य यथायं मम राघव॥ **1.19.18** ॥

तथा कुरुष्व भद्रं ते मा च शोके मनः कृथाः।
इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः॥ **1.19.19** ॥

विरराम महातेजा विश्वामित्रो महामतिः।
स तन्निशम्य राजेन्द्रो विश्वामित्रवचः शुभम्॥ **1.19.20** ॥

शोकेन महताविष्टश्चचाल च मुमोह च।
लब्धसंज्ञस्तदोत्थाय व्यषीदत भयान्वितः॥ **1.19.21** ॥

इति हृदयमनोविदारणं
मुनिवचनं तदतीव शुश्रुवान्।
नरपतिरभवन् महांस्तदा
व्यथितमनाः प्रचचाल चासनात्॥ **1.19.22** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनविंशः सर्गः॥